© 2017 IJSRSET | Volume 3 | Issue 2 | Print ISSN: 2395-1990 | Online ISSN : 2394-4099
Themed Section: Engineering and Technology

# समकालिककाव्यकर्मणः प्रवृत्तयः

शीतला प्रसाद तिवारी
शोधच्छात्रः
राष्ट्रियसंस्कृतसंस्थानम्
गङ्गानाथपरिसरः
चन्द्रशेखराजादोद्यानम् इलाहाबादः

साहित्यं समाजस्य दर्पणं भवति। प्रायेण प्रत्येकं युगस्य साहित्यस्य कतिपयाः प्रवृत्तयः दृश्यन्ते तस्य युगस्य सर्वेषु कविषु।यथा प्राचीनकविषु वाल्मीकिव्यासकालिदासादीनां रचनासु पौराणिकाः ऐतिहासिकाः विषयाः दृग्गोचरीभवन्ति एभिः कविभिः ऐतिहासिकपात्रमाध्यमेन समाजस्य दशां निरूपयन्ति। **यतो धर्मः ततो जयः** एतेषां कवीनां रचनाकर्मणः प्राणतत्त्वमस्ति। इमे कवयः वैदर्भीरीत्या स्वकथ्यानि प्रतिपादयन्ति तेषु पाडित्यप्रदर्शनाय काचिदिच्छा न दृश्यते अतः इमे कवयः ऋषिकवयः सन्ति। अनन्तरं मध्ययुगे भारविमाघदण्डीबाणभट्टादीनां रचनासु विषयाः लोकप्रसिद्धाः ऐतिहासिकाः सन्ति तथापि शब्दावैचित्र्मपि प्रायेण दृग्गोचरं भवति। आधुनिकयुगे कवयः प्रायः छन्दोऽलङ्कारादिभ्यः बन्धनेभ्यः मुक्तिं वाञ्छन्ति ते समसामयिकं विसङ्गतिं तज्जन्यां स्वपीडां यथातथ्यरूपेण अभिव्यञ्जयन्ति। अस्मिन् लेखे मया समकालिकसंस्कृतकाव्यकर्मणः कतिपयाः प्रवृत्तयः उल्लिखिताः सन्ति।

अत्र 'समकालिककाव्यकर्म' इत्यस्याशयः स्वातन्त्र्योत्तरकालिकं काव्यमस्ति। यद्यपि काव्यकर्मणः प्रवृत्तिषु सहसा परिवर्तनं न भवति। साहित्यकलादिषु परिवर्तनानि शनैः शनैः एव आगच्छन्ति। समाजे घटिता काऽपि घटना साहित्यस्य दिशं परिवर्तयति।

भारतीयइतिहासे१८५७ईसवीयस्यक्रान्तिः,राजाराममोहनरायमहर्षिदयानन्दसरस्वतीस्वामिविवेकानन्दादिमहापुरुषाणा–मभ्युदयः राष्ट्रियान्दोलनञ्च महत्वपूर्णाः घटनाः सन्ति यस्मात् कारणात् संस्कृतसाहित्यस्य दृष्टिः परिवर्तिता जाता। स्वतन्त्रतानन्तरं देशे समाजे भ्रष्टाचारं शोषणं स्त्रीणामवमाननं नैतिकतायाः पतनं जातिवादस्य विषम् आतङ्कवादः चेत्यादयः समस्याः जायमानाः सन्ति अद्यत्वे इमे विषयाः कवीनां बाहुल्येन वर्ण्याः सन्ति। अस्मिन् काले संस्कृतकाव्यसर्जनायां कतिपयपरिवर्तनानि दृष्टिगोचराणि भवन्ति। येषां संक्षेपेण विवरणमधोखितं विद्यते।

## पारम्परिकविषयैः सह आधुनिकविषयाणामुपनिबन्धनम्

राष्ट्रियान्दोलनमतीतगौरवं राष्ट्रियविभूतीनां गुणगानमित्यादय एकोनविंशतिशताब्दीत एव कवीनां वर्ण्यविषया जाता आसन्। स्वतन्त्राताप्राप्त्यनन्तरं देशस्य समक्षं कतिपया नूतनसमस्या आविर्भूता यथा– देशस्य विभाजनम्, विभाजनकारणात् देशे शरणार्थीनामागमनम्, पाकिस्तानराज्येन चीनराज्येन च देशस्योपरि आक्रमणम्, समाजे व्याप्ता अस्पृश्यता, जातिवादस्य कारणात् मानवेषु सङ्कीर्णत्वम्, समाजे एकतः धनिकानां सम्पन्नतायां वृद्धिः अपरतः निर्धनानां निर्धनतायां वृद्धिश्च, स्त्रिभिः सह भेदभावः इत्यादयः। इमान् विषयानधिकृत्य संस्कृतेऽपि प्रभूताः रचनाः जाता यथा– पं. बटुकनाथशास्त्रिखिस्तेमहोदयः 'संभ्रमी बभ्रमीति' इति शीर्षके १८७१तमे वर्षे युद्धे पाकिस्तानपराजयं याह्याखानसमर्पणञ्च रोचकत्वेन वर्णितवान्। रामकरणशर्ममहाभागेन 'तैलावलिः प्लवमाना' इति शीर्षके खाडीयुद्धसमये समुद्रे प्लवमानतैलमाध्यमेन बीभत्सराजनीतिः संकटापन्ना मानवता च उपन्यस्ता। यस्मिन् सः दर्शयति यत् केन प्रकारेण एकेन देशेन स्वलाभाय सम्पूर्णं विश्वं सङ्कटे निक्षिप्यते।[1] हर्षदेवमाधवमहाभागः 'आतङ्कवाद' इति शीर्षके आतङ्कवादरूपां दानवीयां प्रवृत्तिं वर्णितवान्।[2]

## पौराणिकप्रतीकमाध्यमैः समकालिकसमाजस्यान्तर्द्वन्द्वप्रकाशनम्

समकालिककवितासु ऐतिहासिकपौराणिकपात्रैः व्यक्तेः अन्तर्द्वन्द्वः चित्रितः वर्तते यथा कमलेशदत्तत्रिपाठिमहाभागः 'सुतनुका' इति शीर्षके सुतनुकादेवदत्तमाध्यमेन अद्यत्वे व्यक्तीनां द्विधाग्रस्तं मनः चित्रितवान्। सुतनुकादेवदत्तयोः उल्लेखः तृतीय–ईसापूर्वस्य रामगढस्य अभिलेखे प्राप्यते।[3] रेवाप्रसादद्विवेदिमहाभागः 'शकटारकाव्ये' नन्दानां कुचक्रम्, शकटारस्य कारागारात् मुक्तिञ्च वर्णितवान् अनेन माध्यमेन नेल्सनमंडेलामहोदयस्य कारागारात् मुक्तिं अभिव्यञ्जितवान्। अत्र शकटारः नेल्सनमंडेला च मानवस्य चिरन्तनजिजीविषायाः युयुत्सायाश्च प्रतीकरूपेण वर्णितौ स्तः।

## सामाजिकविसङ्गतीनामुपरि व्यङ्ग्यम्

कविभिः आधुनिकजीवनस्य विसङ्गतयः यथा समाजे पाखण्डाचरणम, शोषणतन्त्रम्, दुराचरणादिविषयाः चित्रितास्ति यथा– रमाकान्तशुक्लस्य 'वदत् नेतारो मनाक्' भास्कराचार्यत्रिपाठिनः 'समस्तमन्दिरेषु राजते पृथक् पृथक् ध्वजः' कमलेशदत्तत्रिपाठिनः 'धन्या ममेयं धरा' इत्यादयः। अस्य चित्रणस्य पृष्ठे जनेषु शोषणविरोधिभावानां जागरणम् इत्युद्देश्यं वर्तते यथा अधोलिखिते पद्ये देशे व्याप्तो भ्रष्टाचारो वर्णितोऽस्ति।

**यत्र ध्वाङ्क्षनिभाः विरावपटवो नेतृत्वसंसाधकाः**
**उत्कोचौकपराः धनस्य हरणे पारङ्गताः साहिबाः।**
**पूंजीस्वामिहितैकसाधनरताः कुम्भोदराः नायकाः**
**राजन्ते खलु राजनीतिभुजगाः धन्या ममेयं धरा।।**[4]

**संस्कृतपद्यानुवादः**

आधुनिकयुगे संस्कृतकविभिः अन्यभाषाणां काव्यानां संस्कृतपद्यानुवादः कृतः यथा– रामानन्दाचार्यस्य 'लघुकाव्यमाला' मद्रास १६२४,–अस्मिन् शेक्सपीयर–ब्राउनिंगादिकवीनां काव्यांशानां संस्कृतानुवादो विद्यते। महालिङ्गशास्त्रिमहोदयस्य 'किङ्किणिमाला'–अस्मिन्नपि कतिपयानाम् आङ्लकवीनां काव्यांशानां संस्कृतानुवादः कृतोऽस्ति। आङ्लकवितानां संस्कृतानुवादसङ्कलनं 'आङ्लरोमाञ्चम्' इति नाम्ना प्रकाशितमभवत्। कविवरपाठकोऽपि 'गालिबकाव्यम्' इति नाम्ना मिर्जागालिबकवेः 'दीवान–ए–गालिब' इति काव्यसङ्कलनस्य संस्कृतपद्यानुवादं कृतवान्। पुनश्च कविवरपाठकः दाराशिकोहस्य 'मज्म–उल–बहरैन' इति कृतेः 'समुद्रसङ्गमः' इति नाम्ना संस्कृतानुवादं कृतवान्।

### चित्रकाव्यस्य परम्परा

यदपि आधुनिककाव्येषु शब्दचित्रम् अर्थचित्रञ्च दुर्लभं वर्तते तदपि भाषायाम् असाधारणाधिकारत्वात् कैश्चित् कविभिः चित्रकाव्यस्येयं परम्परा अक्षुण्णा कृतास्ति यथा– मथुरानाथशास्त्री 'जयपुरवैभवम्' इति रचनायां विविधचत्वरैः सह चित्रचत्वरमपि उपस्थापयति। सी. एन. रायशास्त्रिमहोदयस्य 'सीतारावणसंवादझरी' इति कृतौ एतादृशी छन्दोयोजना विहितास्ति यत् रावणो यच्छन्दः वक्ति तस्मात् एकाक्षरे न्यूने कृते तदेव सीताया उत्तरं भवति।

### वैयक्तिकभावना स्वच्छन्दमनःस्थितीनां वर्णनञ्च

अस्मिन् युगे कविभिः वर्णनात्मककाव्यैः सह आत्माभिव्यक्तिपरकाणि काव्यान्यपि विरचितानि। कविभिः न केवलं समाजस्य व्यक्तीनां च दशा चित्रिता अपितु स्वमनोदशापि अभिव्यक्ता यथा– कविवरजगन्नाथपाठकः अधोलिखिते पद्ये अभिव्यनक्ति–

**क्व पिकेन कुहूरवः कृतः मधुरागत्य कुतोऽथवा गतः।**
**इति वेद्मि हन्त न साम्प्रतं गहने सन्तमसे विनिःश्वसन्।।**[5]

कविवरपाठकस्य सर्वासु कृतिषु आत्माभिव्यक्तिस्वरः प्रामुख्येन विद्यते। अनेन प्रकारेण अन्नदाचरणस्य 'क्व गच्छामि' तथा च अप्पाशास्त्रिमहोदयस्य 'तिलकमहाशयस्य कारावासः' इति आत्माभिव्यक्तेः उदाहरणानि सन्ति।

### विषयाणां नावीन्यम्

अधुना वैज्ञानिकाविष्कारेभ्यः जीवनं परिवर्तितमस्ति। अतः कवीनां दृष्टिरपि मोटरयानं विद्युत् रेलयानं वायुयानमित्यादिनूतनकथ्यानि विषयीकरोति यथा– विमानयात्राविषयमादाय वेङ्कटराघवनमहोदयस्य कविता 'अभ्रमभ्रमभ्रविलायम्' प्रभाकरनारायणकवठेकरस्य 'विमानवातायनात्' राजेन्द्रमिश्रस्य 'विमानयात्राशतकम्' राधावल्लभस्य 'लहरीदशकम्' सत्यव्रतशास्त्रिमहोदयस्य 'थाईदेशविलासम्' आदयः। अनेन प्रकारेण आधुनिकयुगे छन्दोमुक्तकविता नवगीतविधा अन्यासु भाषासु प्रयुक्तानां छन्दसां संस्कृते प्रयोग इत्यादय प्रवृत्तयः दृश्यन्ते। अधुना संस्कृते हिन्दीभाषायाः दोहा–सोरठा–कवित्त–घनाक्षरी–सवैयादीनाम् उर्दूभाषायाश्च गजलविधायाः प्रयोगो बाहुल्येन उपलभ्यते।

अनेन प्रकारेण एतत् स्पष्टमस्ति यत् संस्कृतरचनाकर्मणि आधुनिकवषयैः सह परम्परागताः विषयाः अपि सहैव प्रवाहमानाः सन्ति। समयानुसारेण संस्कृतकवयः अपि स्वमनांसि साक्षात् अभिव्यञ्जयन्ति यथा मया उपरि दर्शिता अस्ति।

सन्दर्भग्रन्थाः– संस्कृतसाहित्य का इतिहास लेखक–आचार्य राधावल्लभ त्रिपाठी सम्पादकः–आचार्यबलदेवोपाध्यायः प्रकाशकः उत्तरप्रदेशसंस्कृतसंस्थानलखनउनगरम्।

कापिशायनी रचनाकारः –आचार्यजगन्नाथपाठकः सम्पादकः आचार्य–गयाचरणत्रिपाठी प्रकाशकः–गङ्गानाथझाकेन्द्रियसंस्कृतविद्यापीठम् चन्द्रशेखराजादोद्यानम् इलाहावादनगरम्

**सन्दर्भग्रन्थः**

1 दीपिका पृष्ठम्५१
2 अलकनन्दा पृष्ठं ६४
3 दूर्वा प्रवेशाङ्कं पृष्ठं २३
4 कविभारती कुसुमाञ्जलिः भागः ६, पृष्ठं ७५
5 कापिशायनी पद्यसंख्या १२